CC-0. In Public Domain. Digitization by eGangotri

अमृतवाणी

3 B2

THE LIBRARY OF CONGRESS
SERIAL RECORD
APR 3 - 1951
COPY ________

Published by
THE SANSKRIT ASSOCIATION
ST. JOSEPH'S COLLEGE,
BANGALORE
1950

PRINTED BY
V. B. SOOBBIAH & SONS
AVENUE ROAD, BANGALORE-2

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Khoday Products are unrivalled in the market

........................**WHY?**

....................**DO YOU KNOW?**

BECAUSE

They are as good as any imported goods and competative in prices too.

Typewriter Ribbons .... Non-drying & Durable

Carbon Papers .... For Pencil & Typewriters

Printing Inks .... In all colours and for all purposes

Duplicator Inks .... Suitable for all machines

Stamp Pads .... Attractive, non-drying & durable

Ink Powders .... Blue-black and Red

AND

FANCY SILK RIBBONS IN ATTRACTIVE DESIGNS

Enquire with:

KHODAY RIBBON CARBON AND ALLIED INDUSTRIES,

55, Santhusapet — — Bangalore City

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Whenever you require

HIGH CLASS PAINTS, OILS, Etc.,

PLEASE REFER TO

Messrs

SOUTH INDIA PAINT CO.

Muslim Hall Building, Market Gate Road,

BANGALORE -2

WHOLESALE & RETAIL DEALERS

IN

Excellent Enamels, Paints,

Varnishes, Colours,

Linseed Oil, Turpentine,

Brushes, Phenyle etc.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अमृतवाणी
AMRITAVANI

EDITOR
Vidyabhaskara, Vidvan,
M. RAMAKRISHNA BHAT, M.A.,

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विषयानुक्रमः

		पृष्ठम्
१. श्रौतं मङ्गलम्	...	१.
२. रेवास्तवः- (सम्पा)	....	२.
३. श्रीरामकृष्णसहस्रनामस्तोत्रम्	....	३.
४. भगवान् धर्मः (सीतारामशास्त्री)	...	२३.
५. बालशिक्षणम् (स्वामी शिवानन्दः)	...	२७.
६. तुलसीदासगीतिः (,, विमलानन्दः)	....	३०.
७. शुकान्योक्तयः (श्रीनिवासशर्मा)	....	३१.
८. सम्पादकीयम्	....	३२.

CONTENTS

	PAGE
1. Fugitive Love Poetry in Sanskrit (K. S. Ramaswami Sastri)	... 1
2. Bharavi's Narikelapaka (U. Venkatakrishna Rao)	...
3. Contribution of Kashmir to Sanskrit Literature (K. S. Nagarajan)	... 20
4. Excellences of Magha (T. S. Krishnamurthy)	... 31

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



Editor.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Managing Committee.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

॥ ॐ ॥

॥ संस्कृतं नाम दैवी वाक् ॥

॥ वन्देमहि च तां वाणीममृतामात्मनः कलाम् ॥

अमृतवाणी

संख्या ९ } वार्षिकी संस्कृतसङ्कपत्रिका { १९५०

॥ श्रौतं मङ्गलम् ॥

ॐ वेदाहमेतं पुरुषं महान्तम् आदित्यवर्णं तमसः परस्तात् ।
तमेवं विद्वानमृत इह भवति । नान्यः पन्था विद्यतेऽयनाय ॥

ॐ चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके देवजुष्टामुदाराम् ।
तां पद्मिनीमीं शरणमहं प्रपद्ये । अलक्ष्मीर्मे नश्यताम् । त्वां वृणे ॥

ॐ ऋतग्ं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम् ।
ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमो नमः ॥

ॐ नारायणपरं ब्रह्म तत्त्वं नारायणः परः । नारायणपरो ध्याता ध्यानं नारायणः परः । यच्च किञ्चिज्जगत्सर्वं दृश्यते श्रूयतेऽपि वा । अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः ॥

ॐ प्रणवं ह्यीश्वरं विद्यात् सर्वस्य हृदि संस्थितम् ।
सर्वव्यापिनमोङ्कारं मत्वा धीरो न शोचति ॥

ॐ सत्यं वद । धर्मं चर । स्वाध्यायान्मा प्रमदः । आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः ॥

ॐ सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्वि नावधीतमस्तु । मा विद्विषावहै ॥

॥ ॐ शान्तिः शान्तिः शान्तिः ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

॥ रेवास्तवः ॥

शक्तिप्रकर्षजनिताविहतप्रवाहे
मातः सहोदरि भगीरथकन्यकायाः ।
चेतःप्रशान्तितनुकान्तिसमीहितार्थो-
त्पत्तिप्रदे सुतमबोधहतं पुनीहि ॥१॥

त्वत्तीररूढतरवोऽपि निदाघबाधा-
मप्राप्य शीतलपयःपरिपुष्टगात्राः ।
नन्दन्ति भूरि यदि सौख्यसमृद्धिभाजो
नाराधकस्तव सुखं मनुजो भजेत्किम् ॥२॥

अम्ब त्वदीयहृदयं करुणामृतेनाऽऽ-
पूर्णं यतोऽगणितदुःखनिपीडितानाम् ।
त्वं प्राणिनां कुतुकिनी त्वरया महत्या
तद्धावसि प्रतिदिनं कुशलप्रदाने ॥३॥

त्वं नर्मदासि जननि प्रथितार्थयुक्ता
शोकं च चेतनगणस्य निवारयन्ती ।
निःष्यन्दमानजलखेलनहासनादैः
कूलाटवीविहगकूजितनर्मवाक्यैः ॥४॥

त्वं शाङ्करीति च तपोनियमस्वरूपे-
त्याम्नाययोनिरिति पापनिषूदनीति ।
भक्तप्रियेति वरदेति सुखप्रदेति
स्फीतान्वयेति विदितैरुपगीयसेऽम्ब ॥५॥

(श्रीशिवानन्दविलासाख्यमहाकाव्यादेतत्पत्रिकासम्पादकोपज्ञादुद्धृतः ॥)

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

॥ श्रीरामकृष्णाय परब्रह्मणे नमः ॥

॥ श्रीरामकृष्णसहस्रनामस्तोत्रम् ॥

यस्य स्मरणमात्रेण भवबन्धाद्विमुच्यते ।
नरः श्रीरामकृष्णाय नमस्तस्मै परात्मने ॥१॥

त्रैलोक्यध्वान्तसूर्याय करुणानिधये नमः ।
सर्वभूतादिभूताय रामकृष्णाय जिष्णवे ॥२॥

कदाचिद् ध्यानमातिष्ठन् भक्तः कोऽपि हृदि स्थितम् ।
रामकृष्णं तमोऽतीतं प्रणम्याह जगत्पतिम् ॥३॥

"विदितं मे त्वमेवेश भगवान् सचराचरम् ।
सर्वं विश्वमिदं सृष्ट्वा सलीलं पासि हंसि च ॥४॥

त्वत्तो नान्योऽस्ति कोऽप्यन्यस्त्वत्तो भक्तेष्टपूरणे ।
दयार्द्रमानसस्तस्माद्ब्रूहि मे मुक्तिसाधनम्" ॥५॥

श्रुत्वैनमार्तनादं तु रामकृष्णः स्वयं प्रभुः ।
भक्तहृन्निलयः प्राह देवः परमया मुदा ॥६॥

॥ श्रीभगवानुवाच ॥

"मा शुचः सम्पदं दैवीमनुजातोऽसि पुत्रक ।
प्रत्यहं प्रातरुत्थाय बहिरन्तश्शुचिः स्तुहि ॥७॥

मां सहस्रेण सन्नाम्नां तेनेच्छा तव सिध्यति ।
नान्यत्कलियुगे तात कृच्छ्रं कार्यं व्रतं विशां" ॥८॥

अधिगत्यैनमादेशं देवदेवस्य भक्तकः ।
अरीरचत्स्तोत्रमेतत् स्वस्यान्येषां च मुक्तये ॥९॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

रामकृष्णप्रेरितेन तद्दासेन कृतं त्विदम् ।
स्तोत्रं बाढं भवेत्पुंसां निःश्रेयसकरं परम् ॥१०॥

॥ अथ ऋष्यादिन्यासः ॥

ॐ अस्य श्रीरामकृष्णस्य दिव्यसहस्रनामस्तोत्रमन्त्रस्य भगवान् विवेकानन्दस्वामी ऋषिः । अनुष्टुप् छन्दः । श्रीरामकृष्णः परमात्मा देवता । धर्मसंस्थापनोदय इति बीजम् । चन्द्रादेवीसुतोऽनघ इति शक्तिः । जगदम्बापदाश्रवः इति हृदयम् । ध्यानसन्दानिताङ्ग इति कीलकम् । बन्धनाष्टकनिर्भङ्क्तेत्यस्त्रम् । बुधाभ्युपगतामोघावतारः सवितेति कवचम् । सर्वदेवात्मकः कर्मयोगाचार्य इति परमो मन्त्रः । श्रीरामकृष्णप्रीत्यर्थे भगवद्रामकृष्णस्य दिव्यसहस्रनामजपे विनियोगः ॥ ओम् (शिरसि) श्रीविवेकानन्दस्वामिने नमः । (मुखे) अनुष्टुप्छन्दसे नमः । (हृदि) श्रीरामकृष्णपरमात्मदेवतायै नमः । (गुह्ये) धर्मसंस्थापनोदय इति बीजाय नमः । (पादयोः) चन्द्रादेवीसुतोऽनघ इति शक्तये नमः । (सर्वाङ्गे) ध्यानसन्दानिताङ्ग इति कीलकाय नमः । (करसम्पुटे) मम भगवच्छ्रीरामकृष्णप्रीत्यर्थे जपे विनियोगाय नमः ॥

॥ इति ऋष्यादिन्यासः ॥

॥ अथ करन्यासः ॥

ॐ रामकृष्णः प्रशान्तात्मेत्यङ्गुष्ठाभ्यां नमः ।
धर्मसंस्थापनोदय इति तर्जनीभ्यां नमः ।
ब्रह्मण्यो ब्रह्मजिज्ञासुरिति मध्यमाभ्यां नमः ।
नारायणो महावीर्य इत्यनामिकाभ्यां नमः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

महाकालीसुतोऽनादिरिति कनिष्ठिकाभ्यां नमः ।
एकोऽनेको महाग्रास इति करतलकरपृष्ठाभ्यां नमः ।

॥ इति करन्यासः ॥

अथ षडङ्गन्यासः

ॐ रामकृष्णः प्रशान्तात्मेति हृदयाय नमः ।
धर्मसंस्थापनोद्यत इति शिरसे स्वाहा ।
ब्रह्मण्यो ब्रह्मजिज्ञासुरिति शिखायै वषट् ।
नारायणो महावीर्य इति कवचाय हुम् ।
महाकालीसुतोऽनादिरिति नेत्राभ्यां वौषट् ।
एकोऽनेको महाग्रास इत्यस्त्राय फट् ॥

॥ इति षडङ्गन्यासः ॥

॥ अथ ध्यानम् ॥

श्रीमद्गङ्गाप्रतीरे विलसदुपवने कालिकामन्दिरे य-
श्शश्वच्छिष्यावलीनां परमकरुणया तत्त्वबोधं चकार ।
देवीसान्निध्ययोगी भुवनपितृपदे राजमानोऽसमानः
पायान्नो रामकृष्णः स दुरिततितिहा भक्तिगम्यो महेशः ॥१॥

सद्भक्तानां सदा यो मतिभणितिकृतीः प्रेरयन् हृन्निवास-
श्चिद्रूपो धर्मवृक्षं भवपथमथितक्लेशसन्नाशदक्षम् ।
अद्वैताचार्यवर्यः प्रथयति करुणासागरो बाललील-
सोऽयं नो हृत्सरोजे निवसतु भगवान् सन्ततं रामकृष्णः ॥२॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शान्ताकारं समाधौ स्थितमतुलतनुज्योतिषा व्याप्तदेशं
सिद्धे पीठे निषण्णं स्मितलसितमुखं हर्षबाष्पाप्लुताक्षम् ।
चार्वङ्गं स्वर्णवर्णं वरदमभयदं जीवनं सज्जनानां
देवाधीशं भजेऽहं ह्यगणितगुणिनं भक्तितो रामकृष्णम् ॥३॥

सर्वपापहरं देवं प्रणताभीष्टदायिनम् ।
नमामि रामकृष्णं तं निःश्रेयसकरं विभुम् ॥४॥

स्थापकाय च धर्मस्य सर्वधर्मस्वरूपिणे ।
अवतारवरिष्ठाय रामकृष्णाय ते नमः ॥५॥

॥ इति ध्यानम् ॥

॥ अथ श्रीरामकृष्णसहस्रनामस्तोत्रम् ॥

॥ तन्नो हंसः प्रचोदयात् ॥

रामकृष्णः प्रशान्तात्मा विश्वव्यापी सनातनः ।
सदानन्दो विभुः पुण्यो लीलामानुषविग्रहः ॥१॥

अमेयसत्त्वोऽव्यक्तात्मा व्यक्ताव्यक्तो जितेन्द्रियः ।
सर्वभूतहिताकाङ्क्षी वीतरागो दयार्द्रहृत् ॥२॥

वेदान्तनिष्ठो विद्याढ्यः साङ्गवेदाकरो गुरुः ।
मायातीतोऽजातशत्रुर्निर्गुणो गुणसागरः ॥३॥

योगिवर्यो योगरूपः शक्तिमानादिपूरुषः ।
निष्कलङ्को निराधारो निर्व्याजो निरहङ्कृतिः ॥४॥

निर्ममो विग्रहातीतो घनप्रज्ञानसंश्रयः
अतीन्द्रियो विशुद्धात्मा नित्यस्तिमिरनाशनः ॥५॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भानुकोटिप्रतीकाशो निर्भयो भवतारकः ।
विचित्रोदात्तचारित्रो विशुद्धः शाश्वतोऽमरः ॥६॥

गदाधरः कम्ररूपश्चन्द्रादेवीसुतोऽनघः ।
क्षुदिरामात्मजो विद्वान्देवेड्यो वेदपूरुषः ॥७॥

पवित्रजन्मा निष्पापः पितृमोक्षप्रदायकः ।
सर्वलोकानन्ददाता धनीहर्षविवर्धनः ॥८॥

गयादेवांशसम्भूतः शिवरूपो निरुत्तमः ।
रघुवीरप्रसादात्मा धर्मसंस्थापनोदयः ॥९॥

धर्मरूपी प्रसन्नास्यः प्रभुः प्रियतमो महान् ।
वरेण्योऽद्भुतसंस्थानोऽधिकगौरवलाघवः ॥१०॥

असाधारणचेष्टायुक्त सुमेधा मेदिनीक्षमः ।
सुन्दरः सिन्धुगम्भीरो नन्दनो वीतसंशयः ॥११॥

नाटकप्रिय ओङ्काररूप आलेख्यकोविदः ।
प्रकृत्याहितविज्ञानः प्रतिमारचनादरः ॥१२॥

महर्षिवार्ताकुतुकी ध्यानमग्नो विभास्वरः ।
धर्मकामोऽयत्नयोगसमाधिर्विस्मृतावनिः ॥१३॥

कथानुलेखनिपुणो धैर्यशाली प्रियंवदः ।
सीताराध्री ग्राम्यलोकार्पितापूपफलाशनः ॥१४॥

धाता माणिक्यरामाभिपूजितश्चित्तरञ्जनः ।
पितृनिर्याणशोकार्तो धर्मग्रन्थप्रपाठकः ॥१५॥

आम्रोपवनसञ्चारी पितृसद्माभयास्थितिः ।
आर्तत्राणपरो वन्द्यो मातृसेवापरायणः ॥१६॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

धर्मशालानुसञ्चारः साधूनामुपसेवकः ।
विशालाक्षीप्रसादोत्कः प्रसन्नानुग ईश्वरः ॥१७॥

वसन्तजः कुटीरस्थो रामकुमारसोदरः ।
कर्मकारहृद्ग्रामदीपो लीलाविचक्षणः ॥१८॥

जनप्रियः कथालापप्रवणो वेणुगानवित् ।
पुराणनिपुणस्तत्त्वज्ञाता गानविशारदः ॥१९॥

लक्ष्मीजलप्रियः सौम्यः स्त्रैणदेहोऽङ्गनार्चितः ।
बालगोपालसङ्काशो मनोहरवचाः सुधीः ॥२०॥

सर्वसत्त्वसमः पूतो निःस्पृहो भक्तवत्सलः ।
महानटो नाट्यसूत्रधारो हास्यप्रियः स्थिरः ॥२१॥

देवभक्तो बुधानन्ददाता दीनदयापरः ।
स्त्रीवेषचतुरः सर्वमङ्गलाग्रभवो हरिः ॥२२॥

सीतारामप्रियो दान्तो मृदुवाङ्नियमाऽऽस्थितः ।
शिवध्यानपरो ध्यानासक्तस्त्यक्ताभिमानकः ॥२३॥

शिववेषधरो ग्रामजनचित्तापहारकः ।
अमानुषार्भको मातृभक्तो रामेश्वरानुजः ॥२४॥

उपाध्यायप्रियः शुद्धहृदयो मित्रशेवधिः ।
गणितानादरः शम्भुः स्वयम्भूः प्रियसोदरः ॥२५॥

निरामयो दुःखहीनः परदुःखनिपीडितः ।
भुक्ततण्डुलभुक्साधुर्विश्ववैचित्र्यमूर्च्छितः ॥२६॥

औचित्यवेदी वङ्गीयभक्तिगाथापटुर्नरः ।
सुवर्णवर्ण ओजस्वी सत्सङ्गी साधुसेवितः ॥२७॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

चीरवासाः प्रमोदाढ्यो ब्रह्मचारी व्रती यमी ।
ब्रह्मण्यो ब्रह्मजिज्ञासुर्ब्राह्मणाचारतत्परः ॥२८॥

धनीदत्ताद्यभिक्षार्थी जातिभेदपराङ्मुखः ।
भक्ताधीनो भक्तिपात्रमवाङ्मनसगोचरः ॥२९॥

सत्यसन्धो गुणग्राही हर्षाश्रुक्लिन्नसन्मुखः ।
धर्माभिमानी धर्मज्ञोऽधर्मद्विड्धार्मिकप्रियः ॥३०॥

रघुवीरार्चको विद्धरसमाधाताम्बुजेक्षणः ।
श्रीनिवासार्चितः श्लक्ष्णस्तीक्ष्णबुद्धिर्महायतिः ॥३१॥

वृद्धोपसेवी वृद्धेड्यो व्रजलीलाविनोदनः ।
सङ्कीर्तनचणो भव्यो गयाविष्णुसखो विधिः ॥३२॥

ललनाभक्तिसन्तुष्टः सिद्धो वैराग्यभाजनम् ।
परध्वन्यनुकार्यड्यो वैष्णवोद्गीतविजयी ॥३३॥

दुर्गादासचमत्कारकर्ता तन्त्रप्रियो मनुः ।
सदाशिवो जगद्भर्ता रुक्मिण्याद्युपदेशकः ॥३४॥

कालीघट्टगतः प्रेयानग्रजानुग आश्रयः ।
गानारामोऽव्ययः साक्षी भुक्तिविद्यापराङ्मुखः ॥३५॥

विज्ञानकुतुकी नित्यतृप्तो विप्रपुरोहितः ।
भगवान् भगवद्भक्तः श्रद्धावाननसूयकः ॥३६॥

शाश्वतानन्दसंलिप्सुर्ब्रह्मदर्शनतत्परः ।
अविद्याभञ्जको गङ्गाभक्तो गाङ्गेयनिश्चलः ॥३७॥

अध्यात्मशक्तिरल्पाशी जगदम्बापदाश्रवः ।
रासदेवीकर्मयुक्तः शङ्करः पङ्कजाननः ॥३८॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मथुरामोहनानन्ददाता सङ्कर्षणः कविः ।
अजः कृष्णप्रियो गौरः कृष्णो हृदयसेवितः ॥३९॥

विविक्ताश्रयणप्रेमा शिवलिङ्गप्रपूजकः ।
कालीवनचरो देवीमण्डनप्रवणो भवः ॥४०॥

त्वष्टा सङ्कष्टसहनोऽयशस्काम्योऽघमर्षणः ।
स्थिरबुद्धिः स्थितप्रज्ञः प्रतिमाप्रतियोजकः ॥४१॥

सुक्षेत्रजः क्षेत्रनाथः क्षेत्रज्ञः क्षेत्रपावनः ।
निर्द्वन्द्वः समसृद्धेमा निस्सीमः सोमदर्शनः ॥४२॥

साधनं साधकः साध्यः प्रसिद्धः सिद्धवन्दितः ।
ज्ञानं ज्ञेयं रसज्ञाता विज्ञानी ज्ञानिपूजितः ॥४३॥

जितक्षुत्तृट् परब्रह्मबलवांस्तान्त्रिकाग्रणीः ।
आत्मनीनः सुरज्येष्ठो राधागोविन्दपूजकः ॥४४॥

आराधितजनः शृङ्गी बुद्धकुण्डलिनीबलः ।
षट्चक्रनिलयः फुल्लसहस्रारो वसुप्रदः ॥४५॥

दीप्तास्यः प्रेमनिःष्यन्दी संसारासारवित्तमः ।
अमूर्त्तः सत्यसङ्कल्पः शक्तिपूजासुशिक्षितः ॥४६॥

प्रातःसञ्चारनिरत एकाकी सत्यनिष्ठितः ।
भट्टाचार्यस्य सच्छिष्यो ब्रह्मज्ञानप्रतर्पितः ॥४७॥

अभिमानविहीनात्मा महाकालीप्रियो मृडः ।
भीमकान्तार्चको बन्धुः सिन्धुर्दुःस्वप्ननाशनः ॥४८॥

अभ्यासन्दर्शनः पञ्चवटीयोगक्रियारतः ।
धात्रीमूलोपसन्मौनी शौरिः पौरवनामयः ॥४९॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

बन्धनाष्टकनिर्भङ्गः रामप्रसादगीतवित् ।
सन्त्यक्तयज्ञोपवीतः सुखवित्तपराङ्मुखः ॥५०॥

अभ्यासग्निप्रियः पूजाकर्मलीनोऽमृतत्वभाक् ।
अरुणोरोमुखोऽहल्योद्धारी सन्तोषसागरः ॥५१॥

कालीदर्शनतृप्तोऽम्बासम्भाषणरतः शुचिः ।
अचिन्त्यकर्मा द्युतिमानज्ञंमन्यः शिवक्रियः ॥५२॥

ध्यानसन्दानिताङ्गोऽम्बानिःश्वासपुलकाञ्चितः ।
लोकातीतचरित्राढ्यः कालीपादार्पितात्मकः ॥५३॥

देवसान्निध्यदो मातृभोजको निष्परिग्रहः ।
बिडालेक्षितदेवीको देवीमञ्चशयो रविः ॥५४॥

अनिद्रो माथुरालोककपर्दी प्रेमभाजनम् ।
निर्धूतपाप्मा नीरागो देवदासः सखा कृती ॥५५॥

वत्सलो मधुरालोको वायुनन्दनसन्निभः ।
सीताप्रसादसम्पन्नो रामरत्नप्रबोधकः ॥५६॥

तुलसीवनवासीष्टसाधकः सिद्धसाधनः ।
सृष्टिवैचित्र्यविज्ञाता महेशेच्छानुवर्तनः ॥५७॥

श्रीमाथुरगुरुर्भक्तसखो वैष्णवपूजितः ।
स्त्रीमध्यशुद्धो निर्लिप्तो मातृभूताबलाजनः ॥५८॥

जितप्रलोभनो ब्रह्मा हलभृच्छम आत्मवान् ।
सुषुम्नाप्रवहद्रक्तः शास्त्रतत्त्वानुभूतिमान् ॥५९॥

अम्बाम्बेतिसदाक्रन्दी श्मशानकृतसाधनः ।
खोद्बाहौपयिकाख्याता भक्तोच्छिष्टान्नभक्षकः ॥६०॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

श्रीरामचन्द्रजामाताऽऽह्लादनः पूगखादनः ।
शारदामणिकाजानिः कालीसन्ततदर्शनः ॥६१॥

सर्वत्रालोकितब्रह्मा परित्यक्तोपवीतकः ।
अभुक्तोच्छिष्टभुङ् नित्ययौवनो नग्नसाधकः ॥६२॥

प्रतापपूर्णश्चण्डालव्यञ्जनास्वाद आदिमः ।
जटामण्डलयुक्शीर्षो विहङ्गाश्रितकुन्तलः ॥६३॥

नानादिव्येक्षणानन्दो जैत्रः संन्यासिदर्शनः ।
परिव्राट् प्रकटाकारः शरीरज्ञानवर्जितः ॥६४॥

मातृपादाब्जशरणः शुद्धात्मसत्त्वदैशिकः ।
समचन्दनमृत्पङ्को महिम्नःस्तोत्रकोविदः ॥६५॥

महाकालीमहेशानरूपी माथुरसेवितः ।
क्षुण्णपीताम्बरश्चन्द्रपादताडननिश्चलः ॥६६॥

भैरव्याश्वासितोऽशोको महाभावानुभूतिमान् ।
तपःफलमधर्मघ्नो ब्राह्मण्यन्वक्षराघवः ॥६७॥

यशोदायितविप्रस्त्रीभोजितार्भकयादवः ।
सन्तापिततनुर्गङ्गावगाहोत्सुक ईडितः ॥६८॥

शास्त्रीयसाधनो विद्वद्गोष्ठीसम्पूजितो धृतिः ।
बुधाभ्युपगतामोघावतारः सविता यमः ॥६९॥

गौरीपण्डितसम्पूज्यो वैष्णवाङ्घ्रिप्रशंसितः ।
आत्मशक्त्याकरः पूर्णावतारः प्रभुरक्षितः ॥७०॥
ललितो जगदम्बायाः सूनुर्मुग्धार्भकाकृतिः ।
तुल्यनिन्दास्तुतिर्नेता छद्मशून्यः सुरार्चितः ॥७१॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सर्पिणीशक्तिविज्ञाता सप्तमस्थानसंश्रितः ।
मृगपक्षिरुतज्ञोऽष्टभूतिमान्देवदर्शनः ॥७२॥

विभूत्यकामः सुलभो राजराजेश्वरीप्रियः ।
आसमानसुखः सूरिर्ब्रह्मेशस्तन्त्रपावनः ॥७३॥

सिद्धचन्द्रप्रियः स्वामी गिरिजोद्दीपितायनः ।
श्रुतिशीर्षसमापन्नसन्देहानां निरासकः ॥७४॥

वाग्मी परमहंसानुगमनः शमनः श्रुतिः ।
धर्मधेनुर्ग्लानधर्मोज्जीवनः सिद्धतापसः ॥७५॥

पुराणधर्ममहिमप्रमाणं शोकनाशनः ।
अनन्यभावनः शर्म स्वधर्मकुशलो नयः ॥७६॥

परधर्मसहोऽणीयान् नारायणगुरुर्ध्रुवः ।
अशिक्षिताक्षरज्ञानः पद्मलोचनपूजितः ॥७७॥

जिज्ञासुप्रिय आधारः कृष्णकिशोरसत्सुहृत् ।
जटाधार्यनुषङ्गी गोपालगोविन्दमोक्षदः ॥७८॥

वात्सल्यरितो बालरामकेलिरतो वशी ।
नारायणो महावीर्यो नैष्ठिकाग्र्यः परायणम् ॥७९॥

अन्तराधास्वभावोऽम्बाचामरग्राहकोऽतिथिः ।
रोचिष्णुः सात्त्विको वेद्यो योषालङ्कारभूषितः ॥८०॥

कृष्णायितात्मा सङ्कल्पो नानाभावसमन्वयः ।
सर्वत्रेक्षितगोपालः सर्वगो बन्धमोचकः ॥८१॥

भक्तशास्त्राभिदावेदी भवरोगापहः पिता ।
संन्यासी विश्वदृक् तोतापुरीशिष्योऽपवर्गभाक् ॥८२॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अद्वैती क्षिप्रसम्प्राप्तनिर्विकल्पसमाधिगः ।
ब्रह्माभिन्नः परंज्योतिर्गुरुविस्मयभाजनम् ॥८३॥

स्वर्णभाण्डमनाः पूर्णः कौसलेयस्त्रिविक्रमः ।
गुरूपदेशकः सेव्यो मायाविभवबोधकः ॥८४॥

ऐक्यानुभूतिमान् भक्तकायस्थो जगताम्पतिः ।
आवाङ्मनससम्प्राप्यपरमब्रह्मनिर्वृतिः ॥८५॥

षाण्मासिकसमाधिस्थो निर्विकल्पो वरप्रदः ।
आगमाभिज्ञसम्पूज्यो जगदम्बाऽसुपालकः ॥८६॥

ऊरीकृतपरव्याधिर्दुर्निरीक्ष्यः सुभद्रकः ।
गोविन्दादिष्टयवनभक्तिमार्गाप्तनिर्वृतिः ॥८७॥

आत्मसन्निधिनिर्धूतलोकसन्तापसन्ततिः ।
हेमाङ्गिन्यर्चितो भव्यो ब्रह्माब्धिप्लवनाण्डजः ॥८८॥

मार्गे शिवार्चनोद्युक्तस्तुल्यशुच्यशुचिः स्थिरः ।
सन्मात्रं स्पर्शमात्रेण दत्तभावसमाधिकः ॥८९॥

ऊर्ध्वरेता विशुद्धिस्थो विश्वसृट् कलिनाशनः ।
शिवारम्भोऽमर्षनाशी विद्याराशिः शिवप्रियः ॥९०॥

देवर्षिगोपतिः श्यामः पवित्राङ्घ्रिर्गृहेश्वरः ।
सत्यलोकनिवास्तव्यः सामगानप्रियोऽनृणः ॥९१॥

कालः सुचरितप्रीतः सेवालभ्योऽखिलप्रभुः ।
सुशीलः स्वर्गदः शुभ्रः कुमारः स्फटिकद्युतिः ॥९२॥

नैसर्गिकसुहृद्योगनारसिंहो महाबलः ।
ज्ञानस्कन्धो वज्रकायः प्रेरको रघुनायकः ॥९३॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सूर्यमण्डलमध्यस्थस्तेजोमूर्तिर्महायशाः ।
विष्णुः कालान्तको व्यासः कम्बुग्रीवोऽजरामृतिः ॥९४॥
सम्पूर्णाङ्गोऽलङ्करिष्णुः कालज्ञः सद्गतिः शशी ।
दुरितारातिरक्षय्यो निरीशः सुरभिर्गुहः ॥९५॥
मणिपूरान्तरासीनस्त्रिधामा ज्ञानविग्रहः ।
मन्त्रद्रष्टेङ्गितज्ञानी सुधारश्मिर्निराकुलः ॥९६॥
हिरण्यगर्भो विरजा मुकुन्दो विश्वभावनः ।
पुण्यश्लोकोऽग्रसङ्कीर्त्यः सदाचारः कलानिधिः ॥९७॥
उदारकीर्तिरिभ्येढ्यो विश्वभर्ता प्रजापतिः ।
बन्धुदुःखहरो यज्ञरूपी दामोदरोऽक्षरः ॥९८॥
ज्ञानप्रदीपदीप्तार्चिः तारकाख्यो रमापतिः ।
सर्वतन्त्रस्वतन्त्रात्मा शरणागतवत्सलः ॥९९॥
यज्ञभुग्विजयो विश्वसेतुर्विज्ञानशेवधिः ।
तीर्थयात्राप्रियो दीनदुःखतमोऽखिलेष्टदः ॥१००॥
सूक्ष्मभासुरकाशीदृग्विश्वात्मा त्रिगुणाश्रयः ।
आन्दोलिकासुखासीनो लौकिकालापदुःखितः ॥१०१॥
रुद्राद्भुतक्रियाद्रष्टा भूतेशस्तीर्थपावनः ।
सिद्धासनस्थितो धर्मपारगाम्यास्तिकार्चितः ॥१०२॥
श्रीवृन्दावनसञ्चारी सत्योपासी सहस्रपात् ।
श्रीमान् गोवर्द्धनारोही गङ्गामातृप्रसादकः ॥१०३॥
महानन्दो धरानन्दोदयकार्यपराजितः ।
वैणिकाराधितो दिव्यरूपभृन्मधुसूदनः ॥१०४॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

हृदयेक्षितभामूर्तिरक्षयान्तनिवेदकः ।
स्तवप्रियः पद्मनाभश्चैतन्यासनसंस्थितः ॥१०५॥

अज्ञानतिमिरादित्यो नित्योत्सवसमन्वितः ।
शरण्यः क्षेत्रपालेड्यो भगवद्दासबोधकः ॥१०६॥

चैतन्यो जितमात्सर्यो भीमः पतितपावनः ।
माथुरोत्कृष्टगतिदः शूली नरकनाशनः ॥१०७॥

अमृतो गेयसत्कीर्तिश्चित्स्वरूपः कविप्रियः ।
देवीच्छाप्राप्तमथुरानाथनिर्व्याजसेवकः ॥१०८॥

सर्वयोगिप्रियो गीताचार्यः परिवृढो मरुत् ।
चतुर्वेदात्मको विद्यानाथोऽमन्युरकिञ्चनः ॥१०९॥

आयुष्मान् हुतभुग्गर्भः स्कन्दः सर्वशुभाशयः ।
शारदामणिरुद्राणीपूजको ब्रह्मदेशिकः ॥११०॥

अनेकरूपः स्थविरः पुरुषः सर्वतोमुखः ।
बालको बालिकारूपो जायाविज्ञानदायकः ॥१११॥

लोककृत्तीर्थपादेड्यसंवेद्यो मर्मवित्तमः ।
असिधाराव्रती शम्भुवाचितक्रैस्तपुस्तकः ॥११२॥

सबालमेरिकालेख्यदर्शनेदशयोजनः ।
अतर्क्यो वनसन्दृष्टयेसुयोगः परायणम् ॥११३॥

बुद्धावतारः श्रीगर्भः स्वावतारत्वबोधकः ।
लोकानुग्राहकोत्पत्तिर्नानाधर्मविचक्षणः ॥११४॥

स्वतन्त्रात्माऽतुलप्रज्ञः सर्वधर्मसमन्वयी ।
नित्यमुक्तो भविष्यज्ज्ञो भिन्नमार्गनिदानवित् ॥११५॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सर्वावतारधौरेयो धर्मसंस्थापको भृगुः ।
द्वैतादिमतसौपान्यस्थापको जयवर्द्धनः ॥११६॥

गुणातीतो महाभागो राजराजो महाध्वनिः ।
सर्वदेवात्मकः कर्मयोगाचार्यो विनायकः ॥११७॥

जननीधैर्यदो मातृमोक्षदो दक्षिणामुखः ।
व्यूढोरस्को जगद्गोप्ता ज्येष्ठः पीताम्बरोऽजदः ॥११८॥

धीरोदात्तस्त्रिलोकीशो विविक्तो लोकसम्मतः ।
शम्भुपादार्चितो जीवो सर्पफेननिरासकः ॥११९॥

विश्वनाथस्वप्नदृष्टो देवभर्तोरुविक्रमः ।
सत्यप्रियः सहस्राक्षः कपिलः सत्यबोधकः ॥१२०॥

सीतापतिः शास्त्रसारो मूर्तवेदार्थको बली ।
केशनान्तर्हगुह्योघकारी वैश्वानरो हरः ॥१२१॥

विश्वम्भरो वडुभाग्यरूपविशिष्टो गुरूत्तमः ।
कथोदाहरणप्राज्ञः केशवेन्दुसुपूजितः ॥१२२॥

सर्वतन्त्रात्मकः सर्वमन्त्रमूर्तिरतन्द्रितः ।
मूलाधारैकनिलयः सर्वयन्त्रप्रतिष्ठितः ॥१२३॥

अर्केन्दुनयनः कालरुद्रो ब्रह्माण्डनायकः ।
हायनः सुकुमाराङ्गो मासः पक्षो दिनं क्षणः ॥१२४।

ऋतुर्युगं महासेनो बलभद्रो नरोत्तमः ।
निरत्ययः पुरोगामी विभीषणसुपूजितः ॥१२५॥

ज्येष्ठराजो गवानन्दो वैकुण्ठो धरणीधरः ।
भ्राजिष्णुः परमस्पष्टो मेधावी नन्दनन्दनः ॥१२६॥

3

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विद्युदुद्द्योतवान्वामदेवो योगिमनोनटः ।
मृत्युपर्वतदम्भोलिर्ब्रह्मगोष्ठ्युपकङ्कृणी ॥१२७॥

मूर्तिपूजागुणग्राही केवलो ब्रह्मणस्पतिः ।
ज्ञातसर्वविधिर्ध्येयः पराकाशो दुरासदः ॥१२८॥

अरूपो रूपसम्पन्नः सर्वसाक्षी स्मरान्तकः ।
चिन्तामणिर्ब्रह्मनिधिः प्रपन्नार्तिहरस्तपः ।१२९॥

लोहिताङ्घ्रिर्दुराधर्षो महात्मा दीर्घदर्शनः ।
दशावतारस्तुलसीप्रियः सत्त्वात्मको भगः ॥१३०॥

महाकालीसुतोऽनादिः स्तोत्रप्रीतो हृदिस्थितः ।
मङ्गलायतनं विश्वानन्दो बुद्धिविकासकः ॥१३१॥

एकोऽनेको महाग्रासः श्वेत आशाप्रपूरकः ।
सच्चिदानन्दसन्दोहो योगसाध्यः सुरर्षभः ॥१३२॥

हेमाद्रिनिलयो राधारमणः कश्यपो दमः ।
ज्योतीरूपस्तीर्थराजो विधिकृद्वेदवल्लभः ॥१३३॥

सर्वदो निर्मदो ज्वालामाली द्वैपायनो मधुः ।
गुहानिविष्टोऽमेयात्मा महाभाग्योऽप्रकम्पनः ॥१३४॥

निरवद्यश्चिदाकाशो मार्तण्डो निरुपद्रवः ।
सनत्कुमार आनन्दकन्दो दाशरथी रथी ॥१३५॥

श्रुतिगीतो विश्वमूर्तिरष्टमूर्तिर्बहुश्रुतः ।
ग्रहताराग़णापीडो निस्तुलो विश्वतोमुखः ॥१३६॥

रश्मिमाली निराभासो जयकृष्णप्रसादकः ।
अस्पृष्टकामिनीहेमा वचःसंवादिचेष्टितः ॥१३७॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शिवनाथप्रियोऽक्रूरो वित्तस्पर्शसमाधिमान् ।
साधनारम्भहितवाग्जनश्लाघापराङ्मुखः ॥१३८॥
सर्वसर्वस्वभूतात्मा यथापात्रोपदेशनः ।
भक्तविश्वाससम्पोषविधाता सिद्धपूरुषः ॥१३९॥
कविस्त्रैलोक्यनाथोपदेष्टा निःस्पृहतल्लजः ।
अवताराभवक्तार्यश्रेष्ठः प्राग्धर्मपूजकः ॥१४०॥
विवेकी सुजनस्निग्धः प्रलधर्मासुदायकः ।
पाश्चात्यविद्यासंमूढचेतनोद्बोधनोत्सुकः ॥१४१॥
चैतन्यसङ्घसङ्गीतदर्शनः पूर्वशिष्यवित् ।
योगमायासमा॒रूढः साधुवृन्दनिषेवितः ॥१४२॥
उदरार्तो बहुपूपखादी क्लिन्नान्नभोजनः ।
शोणकौशेयवसनो देहशोभापराङ्मुखः ॥१४३॥
सदासर्वोपगन्तव्यो वित्तसङ्कथनार्दितः ।
भक्तसन्दर्शनोत्साहः शिष्याह्वाता शुचिस्मितः ॥१४४॥
भाविशिष्यविचारालिपूर्णचित्तो दिवाकरः ।
शिष्यनिर्बन्धविज्ञाता मोहनोन्मानभेदकः ॥१४५॥
श्रीरामदृष्टचैतन्यो नास्तिकालोकदायकः ।
अनिवेदितभोज्याशुर्गशयोगप्रदर्शकः ॥१४६॥
सुरेन्द्रमाननिर्भेत्ता सुरेशातिथ्यहर्षितः ।
बकुलच्छायसंविष्टो मधुदोषापनोदनः ॥१४७॥
केदारभक्तिसुप्रीतो विवेकत्यागबोधकः ।
महिमाङ्किज्ञानदेष्टा दम्भाहङ्कारभेदनः ॥१४८॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पुत्रायमाणराखालो मुग्धलाटूविबोधकृत् ।
वृद्धगोपालसम्पूज्यो नरेन्द्रापूपभोजकः ॥१४९॥

नरावतारविज्ञाता समाध्याचोचितोत्तरः ।
समाधिदृष्टसप्तर्षिर्नरविश्लेषदुःखितः ॥१५०॥

नरेन्द्रात्यधिकप्रेमा शुद्धस्फाटिकसन्निभः ।
स्पर्शदत्तश्रीनरेन्द्राद्वैतानुभवविस्तरः ॥१५१॥

अतिमानुषसामर्थ्यो महामायी नियन्त्रकः ।
नरेन्द्राभिन्न एनोहा विवेकानन्दजीवितः ॥१५२॥

हरीशत्यागसुप्रीतो भावनाथविशुद्धिनुत् ।
रक्षाबन्धनभृद्धस्तस्तारजिह्वाविलेखकः ॥१५३॥

स्वपादपांसुसम्पूतरामकर्णो भवापहः ।
कटाक्षोद्बोधितात्मौजा नित्यगोपालनर्तकः ॥१५४॥

समाध्यवेद्यसंलापो बलरामप्रियः कृशः ।
अङ्गविद्येङ्गितज्ञानी दयालूदत्तमोदकः ॥१५५॥

प्रपन्नबाबुरामाख्यः शुद्धसत्त्वो विभावसुः ।
महेन्द्रसेवितः शुद्धनिरञ्जनसमर्चितः ॥१५६॥

गदानुरूपभैषज्यो भिन्नयोगीन्द्रमार्दवः ।
लोकवृत्तविदुन्मत्तकल्पः कूटस्थ ऊर्जितः ॥१५७॥

ईशानकोटिसंसेव्यः कर्मसाफल्यदायकः ।
नित्यसिद्धावृतो हंसोऽश्विनीबालकभक्तिदः ॥१५८॥

विद्यासागरसंलापी चन्द्रसेनान्नदुःखितः ।
प्राणकृष्णोरुसम्भाषोऽधरचन्द्रोपदेशकः ॥१५९॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

देहनश्वरतादेष्टा तारकानुगदेहभाः ।
वैकुण्ठनाथविज्ञातशङ्करः क्रमनाशनः ॥१६०॥

वैदेहनिभनागेज्यो दुर्गापादेष्टदैवतम् ।
सुरेशगिरिशाचार्यो भक्तसाधनकारकः ॥१६१॥

स्वशिष्यहितकामास्थिविकृतः शिष्टवन्दितः ।
स्त्रीदृष्टदिव्यसंस्थानः कालिपादोपदेशकः ॥१६२॥

शशिनिर्व्याजताप्रीतो हरिनाथप्रपत्तिनुत् ।
शिवरूपशरत्स्थैर्याराधितो दीनबान्धवः ॥१६३॥

गङ्गाधरसखो वाणीप्रसन्नबहुदोषहृत् ।
हरिप्रसन्नवैराग्यबोधकस्तुलसीप्रियः ॥१६४॥

कालीसुबोधात्मशक्त्युद्बोधनः सुरितोषकः ।
प्रत्यक्षः स्वावतारोपकारिदेवांशजानुगः ॥१६५॥

योगिन्याद्यबलाचार्यः स्त्र्यघोरमणिपूजितः ।
स्वभोजननिरस्तान्यक्षुधः परमहंसकः ॥१६६॥

अनर्हादेशनिष्पन्नगलार्तिः शिष्यसङ्ग्रकृत् ।
नरेन्द्रारोपितात्मौजा रामकृष्णावतारभृत् ॥१६७॥

शिष्यसंहतिनेतृत्वनियुक्तनरकेसरी ।
समाधिश्रितनिर्वाणः सदाभक्तप्रसादकः ॥१६८॥

॥ सदाभक्तप्रसादक ओं नम इति ॥

इतीदं रामकृष्णस्य परब्रह्मस्वरूपिणः ।
नाम्नां सहस्रं दिव्यानामशेषेण प्रकीर्तितम् ॥१॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

यस्त्विदं प्रातरुत्थाय नित्यं भक्तिसमन्वितः ।
कीर्तयेत्स तरेच्छोकं संसाराब्धिमयत्नतः ॥२॥

ब्रह्मचारी पठन्नेतत्सततं वेदपारगः ।
सर्वशास्त्रप्रवीणश्च तेजस्वी जायते ध्रुवम् ॥३॥

गृहस्थो यदि कुर्यात्तु पारायणममुष्य सः ।
लभेताभीष्टसिद्धिं च दैवभक्तिं परामपि ॥४॥

यः पूजयति वै रामकृष्णं नानाप्रसूनकैः ।
उच्चार्यैतानि नामानि सोऽमृतत्वाय कल्पते ॥५॥

इमं स्तवं भगवतो रामकृष्णस्य कीर्तितम् ।
पठेद्य इच्छेत्पुरुषः श्रेयः प्राप्तुं सुखानि च ॥६॥

विश्वेश्वरमजं रामकृष्णं विश्वलयोद्भवम् ।
भजन्ति योगराजं ये न ते यान्ति पराभवम् ॥७॥

॥ इति श्रीरामकृष्णसहस्रनामस्तोत्रं सम्पूर्णम् ॥

॥ श्रीरामकृष्णार्पणमस्तु ॥

॥ ॐ तत्सत् ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

॥ श्रीः ॥

*॥ भगवान् धर्मः ॥

अभिनववाल्मीकिः, ब्र. सि. सीतारामशास्त्री

विदितवेदितव्यस्य साक्षात्परब्रह्मानुग्रहपात्रस्य भगवतो महर्षेर्वल्मीकजन्मनो धर्माधर्मावधिकृत्य कः सिद्धान्त इति समीक्षा करणीयेत्यस्माकमभिसन्धिः। केचित्तु विषयसुखगृध्नवो मन्यन्त आधुनिका यद् धर्मस्य प्रशंसा अधर्मस्य परीवादश्च स्वार्थलोलुपैः पण्डितमानिभिर्लोकप्रतारणकुशलैर्व्यधायीति। भगवान्महर्षिस्तु करबदरमिव निखिलं जगदालोक्य प्राचीनाग्रेष्वपविष्टो दर्भेषु यत्पावनं रामायणं 'सीतायाश्चरितं महद्' इति 'पौलस्त्यवध' इति च लोके बहुधा व्यपदिश्यमानमरीरचल्लोकानुग्रहकांक्षया तदेव वेदसंमितं सर्वात्मनोपादेयमिति बाढं प्रतीमः।

धर्मो ह्यधर्मं नाशयति, धर्मफलन्तु न पारयति नाशयितुमधर्मफलम्। यतो हि धर्मो धर्मफलमेव सूते, अधर्मश्च अधर्मफलम्। तत्तत्कर्मफलं च सर्वेणाप्यनुभवितव्यमेव। तथा चोक्तं 'न तु धर्मोपसंहारमधर्मफलसंहितम्। तदेव फलमन्वेति धर्मश्चाधर्मनाशनः' इति। इदमाञ्जनेयेन रावण उक्तः। 'भो राक्षसेश्वर त्वयाद्य यावत् स्वाचरितधर्मस्य फलमुपभुक्तम्। इतः परन्तु फलमधर्मस्योपभोक्तव्यम्' इति तत्र भवान्महर्षिस्तं रक्षोऽधिपतिमभाणीत्। एवमन्यत्र महाराजेन दशरथेन स्वमहिषीं कौसल्यां सम्बोध्य "यादाचरति कल्याणि शुभं वा यदि वाऽशुभम्। तदेव लभते भद्रे कर्ता कर्मजमात्मनः" इति निगदितम्। मण्डोदर्यपि स्वभर्तारमेवं व्यज्ञापयत् "शुभकृच्छुभमाप्नोति पापकृत्पापमश्नुते"।

---

* देशभाषायां लिखितोऽयं लेखः सम्पादकेन गैर्वाण्यानूदितः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

रावणोऽपि जन्यस्य प्रथमेऽह्नि श्रीरामेण पराजितो गृहं प्रतिनिवृत्त एकाकी बहु स्मरणपूर्वकं चिन्तयन्नात्मनि विललाप । तथा हि—"यः पुरा मेऽनरण्येन शापो दत्तः, यो वा 'यस्मादेष परक्यासु रमसे राक्षसाधम । तस्मात्त्वं स्त्रीकृतेनैव प्राप्स्यसे दुर्मतिर्वधम्' इति सुरनारीभिर्दत्तः, या वा प्रतिज्ञा श्रीमत्या वेदवत्या 'तव वधार्थं समुत्पत्स्येऽहं पुन'रिति कृता, यो वा शापो भगवत्या उमादेव्या व्याहृतः, यो वा तत्र भवता नन्दीश्वरेणोच्चारितः, यो वा रम्भानिमित्तेन नलकूबरेण मे दत्तः, यो वा भगवता ब्रह्मणा वरुणसुतायाः पुञ्जिकस्थलायाः कृते दत्तः, तस्य सर्वस्य फलमधुनोपनतं मम" इति ।

तत्र भवती तारापि रामशरविदीर्णहृदयमुद्वीक्ष्य स्वदयितं वानराधिपतिं वालिनमवादीत्-"नाथ, अस्मत्कुलधर्ममतिक्रम्य यत्त्वया ध्रियमाणस्यापि अनुजस्य सुग्रीवस्यापहृतं कलत्रम्, सोऽपि सन्ताड्य नगरान्निर्वासितः, तस्य पापस्येदानीमनुभूयते त्वया फलम्" इति । एवं माल्यवांश्च राक्षसो राक्षसेश्वरं रावणं सम्बोध्य बभाषे-"रक्षःपते यदा धर्मोऽधर्मं ग्रसते तदा कृतयुगं प्रवर्तते । यदा च अधर्मो धर्मं विलुम्पति तदा तुरीयं कलिनामकं प्रचलति । पूर्वं ब्रह्मण एवोभौ धर्माधर्मावुदपद्येताम् । आदितेया धर्मं जगृहुः, असुराश्चाधर्मम् । अङ्गीकृताधर्मैरस्माभिरधर्मेणैव जगज्जेतव्यम् । एवं स्थिते धर्मपरायणा महान्तो हन्यन्ते अवज्ञायन्ते च त्वया । अनेन कारणेन सोऽयं महान् धर्मस्त्वया निहतः स्यात् । आद्येषु त्रिषु युगेषु धर्मोऽधर्मेण न शक्यते जेतुम् । यस्मादधर्मः सुरारतिपरिगृहीतः, प्रथमे युगत्रये धर्मस्यैव प्राबल्यम्, धर्माभिवर्द्धकैरभितो धर्मः परिपोषं नीयते च, तस्माद् अधर्मो मनागपि धर्मं न प्रभवति परामवितुम् । कलौ त्वधर्मस्य बलीयस्त्वात्, अधर्मचारिणामाधिक्यात्, धर्मस्य चापचीयमानत्वादधर्मो धर्मं नाशयिष्यति । यस्मादिदं त्रेतायुगम्, त्वया चासुरेण धर्मद्रुहा परदारहरणादीन्यनेकानि

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पापकर्माण्याचरितानि, निसर्गतश्चात्र युगे अधर्मो बलहीनः, धार्मिकैर्ऋषिभिश्च युगधर्मानुसारेण यागादिभिर्धर्म्यकर्मभिरधर्मः कुण्ठितशक्तिर्विनाशं नीयते, विनश्यतोऽधर्मस्य च फलमपि विनश्वरम्, संरक्षति च धर्मो धार्मिकौ रामलक्ष्मणौ, यस्माच्च अधर्मभूयिष्ठेन त्वया न तौ जय्यौ, तस्माज्जहीहि रामदारान् । साम्प्रतमेतत्तव साम्प्रतम् । अन्यथा परदारापहरणं नाम महत्पापं मूर्च्छेत्त्वयि । तेन विनाशोऽपि तवावश्यम्भावी । मास्तु सन्देहः" इति ।

अस्मादयमर्थो निर्गलति स्फुटः । यथा-रामायणदृष्ट्या त्रेतायुगवर्तिनां धर्मोऽधर्मं निहन्ति, न तु कलियुगवद् अधर्मो धर्ममिति । श्रीमद्वाल्मीकिमुनिहृदयं च सर्वैरप्येकजन्मनि कृतानां पुण्यपापानां फलानि तस्मिन्नेव जन्मनि भोक्तव्यानीति ग्रन्थपरिशीलनेन सहृदयानां सम्यग्विदितं भवति । ननु 'कीदृशं तु मया पापं पुरा जन्मान्तरे कृतम्' इत्यादि वचनं कथमप्रमाणमिति चेत्, उच्यते । तत्रैव भगवानृषिरेतद्विलापवचनमित्युक्त्वा नैतन्मम मतमिति स्वहृदयमञ्जसा प्रकाशितवान् ।

इदमत्रावधेयं भवति प्रकरणे यद् धर्मस्य सत्फलं पुण्यं वा परिणामः, अधर्मस्य त्वसत्फलं पापं वा । उभयमपि कर्त्राऽनुभाव्यमेव । युगवैलक्षण्यात्कर्मलोपाच्चानुष्ठीयमानस्य धर्मस्य ह्रासो जायत एव । अधर्मश्च ततो निष्पद्यते । तन्निरासाय शीघ्रं प्रायश्चित्तमाचरणीयम् । तेन चाधर्मे नष्टे तत्फलमपि नश्यति । तदा विराजति निराबाधं धर्मः । धर्माचरणसमनन्तरमेव नरस्तत्फलमुपक्रमते भोक्तुम् । तदुपभुञ्जानस्तज्जन्यसुखानुभवावलेपदोषदूषित 'अयमधर्मः' इत्यजानन्नेवाचरत्यधर्मम् । यद्वा तादृशमदेन बुद्धिपूर्वकमधर्ममाचरति । अयमत्र विशेषो यत्प्राणी धर्मफलमनुभवन्नेवाधर्ममाचरति, न पुनर्जातु धर्ममनुतिष्ठन्, युगपदुभयोरपि दुष्करत्वात् । स्वानुभूतिकालेऽधर्मा-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

चरणाद्धर्मफलं न शक्नोति नाशयितुमधर्मम् । ननु धर्मे प्रभवति नाशयितुमधर्मं धर्मफलं शक्नुयात्समूलघातमधर्मफलं हन्तुमिति चेत, न । धर्मस्य तत्फलायमानसुखानुभूतये केवलमनुष्ठीयमानत्वात्, अधर्मस्य च तादृगनुभूतिकाले एवाऽऽचर्यमाणत्वात् । अनुभूते हि कृत्स्ने धर्मफले स धर्मस्तत्फलं चोभयं स्वयं विलीयते । ततः परमवश्यमवशिष्टस्याधर्मस्य फलमनुभोक्तव्यं भवति । नन्वेतस्मिन्नन्तरे क्रियमाणो धर्मस्तदधर्मफलं व्यपोहितुं शक्नुयादिति चेत्, न कदापीति ब्रूमः । यतो धर्म एव अधर्ममुत्सादयितुं क्षमः, न पुनर्धर्मो वा तत्फलं वा अधर्मफलम् । उभयोरपि फलयोरवश्यमनुभवितव्यतया एकमन्यस्य फलं न पारयति विनाशयितुमित्ययमर्थः सिध्यति ।

अथ कश्चिद् ब्रूते-"अहं प्रथममधर्मं विधाय तत्फलं चानुभूय पश्चाद् धर्ममनुष्ठाय तत्फलमनुभवितुमिच्छामी"ति । नैतत्सङ्गच्छते । यन्न कोऽपि जगति जन्तुरधर्ममनुष्ठाय तत्फलभूतं दुःखमनुभवितुमभिलषति । शैशवे त्वज्ञानेन कृतानि वृजिनानि कर्तुः पितरावाश्रयन्ति । अत एव तौ पुत्राना शैशवात्सुखानुभवशालिनो विधातुमधर्माद्विरमय्य धर्मक्रियानिरतान्विदधाते । 'प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम्' इति न्यायेन च जीवितप्रारम्भ एव न केनापि दुःखफलस्याधर्मस्य भूयेत पक्षपातिना । अन्यच्च । सर्वैरप्यनुभवनीयं खलु केवलमन्तकाले स्वकृतस्य फलं कर्मणः । धर्मफलानुभववेलायामधर्मफलं मध्ये न प्रवर्तते । अत एव 'भो रावण, एतावत्पर्यन्तं धर्मफलसामग्र्यस्यानुभूतत्वादितः परं त्वया स्वाचरिताधर्मफलमवश्यमनुभवितव्यम्' इति मारुतिर्व्याजहार पौलस्त्यम् ।

अमुना न्यायेन महाराजो दशरथोऽपि प्रथमं सुचिरमनुभूय धर्मफलम् अज्ञानाचरितमुनिकुमारवधापन्नाधर्मफलमन्वभून्निधनकाले । तथा

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

चोवाच सः—"धर्मं वा अधर्मं वाऽऽचरता नरेण तत्तत्फलं ध्रुवमनुभोक्तव्यम्। मयापीदानीं तदेवानुभूयते" इति। रावणोऽपि ज्ञानपूर्वकमात्मना कृतान् अधर्मान् स्मारम् स्मारम् "अन्त्यावस्थायामस्यामनुभवामि कृतानां पाप्मनां फलानि" इति व्याजहार। तारापि समरभुवि रामशरपरितप्तशरीरं पतितं जगाद वालिनम् "भुङ्क्ते भवानधुना फलं कुलक्रममतिक्रम्य वेदं वेदमाचरितस्य अधर्मस्य" इति।

उपर्युक्तोदाहरणगणहेतुना एतद्ग्रन्थाभिमतमेवं विज्ञायते। यथा-प्रकृतजन्मनि कृतस्य धर्मस्य वा अधर्मस्य वा फलं त्रेतायुगरीत्या तत्रैव जन्मनि भुङ्क्ते जन्तुरिति। अतः श्रीमद्वाल्मीकिरामायणस्वारस्यग्राहिणावश्यं सिद्धान्तो न तिरोहितः स्याद्यद् धर्मोऽधर्मं हिनस्ति, न पुनर्धर्मफलमधर्मफलम्। तत्तत्फलं सर्वथा चानुभोक्तव्यम्। न तस्यास्ति व्यतिक्रमः। धर्मो धर्मफलं दुग्धे, अधर्मस्त्वधर्मफलमिति।

॥ ॐ स्वस्ति ॥

बालशिक्षणम्

॥ श्री स्वामिशिवानन्दसरस्वतीमिश्राः ॥

पितरावेव पुत्राणां भवतश्चरित्रस्य प्रतिभुवौ। तौ यदि धर्मपराङ्मुखौ, तर्हि तत्पुत्रा अपि तादृशा भवन्ति। शैशव एव बालानां धर्मसमारोपणं पित्रोर्भवति प्रधानं कर्तव्यम्। ताभ्यां स्वयं दिव्यः पन्था अनुसर्तव्यः। बालकस्य हृदये उप्ता धर्मसंस्काराः कालेन यौवनमधितिष्ठति तस्मिन् बद्धमूलाः पुष्पिताः फलिताश्च जायन्ते।

असीत्पुरा ज्ञानधवला श्रीमती मदालसा नाम। सा सर्वानकुरुत निजतनयाञ्ज्ञानिनः। पुत्रं डोलायां शाययित्वा तां चालयन्ती गायति स्म

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

च - "शुद्धोऽसि । बुद्धोऽसि । निरञ्जनोऽसि" इति । मातुः स्तन्येन सार्कं पुत्रा वेदान्तसारं निपीय महर्षयो बभूवुः । एवं सर्वाभिर्योषिद्भिर्मदालसा-वृत्तानुकारिणीभिर्भूत्वा सत्यस्य धर्मस्य च मार्गेण निजपुत्रा विनेतव्याः । प्रथमवयसि निहिताः संस्कारा नरस्य स्वभावेऽतिगभीरं मूलं प्रसारयन्ति । अतः पितृभ्यां श्रीमद्रामायणभागवतादिकथाप्रवचनेन, भगवत्प्रार्थनायास्त-न्नामसङ्कीर्तनस्य चाभ्यासेन बालकानां मनसि धर्मसंस्कारा (धार्मिकविचारा) उत्पादनीयाः । संस्कृतविद्याभ्यासश्च तेषां कारयितव्यः । यथा च बालका विधिवत्सन्ध्योपासनं प्रातर्मध्याह्ने सायाह्ने च निर्वर्तयेयुः, श्रीमद्भगवद्गीता-रामायणादीनि ग्रन्थरत्नानि अधीयीरन्, प्रत्यहं जपं च कुर्युस्तथा ताभ्यां प्रयत्न आस्थेयः । इदमेव तयोः प्रधानं कर्तव्यम् । तौ स्वकर्तव्याद्यदि प्रमाद्यतस्तर्हि तत्सुता धर्मविमुखा दुर्विनीताश्च भवेयुः ।

यः पुत्रमसदनुशास्ति स न भवति पूजार्हः । यो पुत्रमसमञ्जसोप-देशेन विनाशयितुमीहते तदवधीरणा न जनयति पापम् । यदि कश्चिद् विरक्ते विषयैरनाकृष्टचित्ते भगवद्भजनपरायणे धार्मिकस्वभावे चात्मजे बुद्धि-भेदं कर्तुं यतते तर्हि स महापापमेव कुरुते । यदा पिता विषयगुहायां बालकं निपातयितुमीहते, यदि वा अध्यात्माध्वनि तदभ्युदयं न सहते, प्रत्युत निरुन्धे, तदापि स कुरुते महान्तमपराधम् ।

चतुर्षु सुतेषु सर्वथा निवृत्तिपथाश्रयणाय आत्मानुसन्धानाय च सञ्जातकौतूहलमेकमपि पिता सन्तोषेण विसृजेत् । अयमेक एव सुतोऽध्यात्म-विद्यायाम् ईषदपि जाताभ्युदयः स्वकुले जातानां सर्वेषां तत्र मार्गदर्शी भवेत् । तैः सार्धं निवसंश्च तेषु शक्तिं शान्तिमानन्दं चादधानः संसारपङ्का-त्सानुद्धरेत् । अद्यत्वे तु सर्वोऽपि "मम पुत्राः भिषजो वा भारतशासनसेवा-निरता वा महाप्राड्विवाका वा सम्पद्येरन्"निति कामयते । नापेक्षते चैकमपि

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पुत्रं सत्यपथेन सञ्चरमाणम् । यदा बालो भगवद्गीतामधीते तदा पिता 'मम पुत्रः संन्यासी भवेत्किमु' इति बिभेति । पुत्रस्यात्मोन्नतिमार्गे विघ्नान् बहूनातनोति गार्हस्थ्याय च तं बलात्प्रेरयति । अत एव विषयविक्लवचेता नरः स्वपुत्रेषु लब्धप्रतिष्ठेष्वपि सदा दुःखमास्ते । आत्मनिष्ठो हि सुतः कुलस्य महान् निधिः ।

"देवपितृकार्याभ्यां मा प्रमदः । मातृदेवो भव । पितृदेवो भव । आचार्यदेवो भव । अतिथिदेवो भव । यान्यनवद्यानि कर्माणि तानि सेवितव्यानि नो इतराणि..."।

आत्मोपासना सर्वदा कार्या । क्रमबद्धमस्तु ते जीवितम् । शोभय चरित्रम् । उपचिनु उदात्तं धार्मिकं च वृत्तम् । धर्मपरायणो भव । परहितसापर । गुरौ भव भक्तः । यावज्जीवं भव व्रती । करुणां तितिक्षाम् अहिंसां पवित्रं प्रेमाणं च वर्द्धय । भवोदारः । त्यागं कुरु । तेन त्वमचिरेणैव आत्मबोधमवाप्स्यसि ।

दिव्यभावेन अनवरतमाचरिता पितृशुश्रूषैव नरं संसारान्मोचयितुं पारयति । पुण्डलीको नक्तन्दिवं वृद्धपितृसेवयैव कृत्स्नं जीवितं निनाय । आविर्बभूव भगवान् श्रीकृष्णः पितृसेवानिरतस्य पुरतस्तस्य । पितृभक्तस्तं न भगवन्तं यथावत्संभावयामास । अपि तु देवस्योपवेशनाय कानिचिदिष्टकाखण्डानि प्रक्षिप्य यथापूर्वं पितृपरिचर्यां निर्वर्तयति स्म । समाप्तायां च तस्यां स हरिमुपेत्य पूजयामास । अत एव श्रुतय उद्घोषयन्ति - "मातृदेवो भव । पितृदेवो भव" इति । बभूव किल महाराष्ट्रेषु साधनो नाम सौनिकः पितृसेवापरायणो महान् ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

॥ तुलसीदासगीतिः ॥

॥ स्वामी विमलानन्दः ॥

हरे महान्मह्यमनुग्रहस्त्वयं
    तनुं यदेतां सुरदुर्लभामदाः ।
विरक्तिभक्त्यादिपवित्रसाधन-
    क्रियाश्रयीभूतमिदं ध्रुवं वपुः ॥१॥
महोपकारांस्तव कोटिभिर्मुखैः
    प्रभो प्रभुर्वर्णयितुं न कश्चन ।
तथाप्यहं नाथ पुनश्च याच्ञया
    समागतस्त्वां करुणार्णवाधुना ॥२॥
मीनोपमं मामकमानसं सदा
    क्रीडां विधत्ते विषयाम्बुधौ भृशम् ।
विपत्समूहान्बहुदारुणानतो
    हरे सहेऽहं बहुयोनियन्त्रितः ॥३॥
कृपां च रज्जुं बडिशं पदाङ्कुशं
    खाद्यं भवत्प्रेमसुधारसात्मकम् ।
विधाय हे राघव कौतुकाय ते
    समुद्धरेमं बहुदुःखसागरात् ॥४॥
यागाद्युपाया बहवः श्रुतीरिता-
    स्तथैव देवाः कति ते न याचिताः ।
येनैव बद्धोऽस्मि विमोहरश्मिना
    स एव मोक्ता तुलसिं न चापरः ॥५॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शुकान्योक्तयः

॥ डॉ. श्रीनिवासशर्मा - चिदम्बरम् ॥

नाधीती निगमे न चागमकुले त्वं नापि सङ्गीतके
नाट्ये नैव परन्तु वीक्ष्य जनता रूपं निसर्गोज्ज्वलम् ।
यत्त्वां स्थापयतीह पञ्जरगतं कृत्वादरात्स्वगृहे
श्रेष्ठं ते सदने शुकोत्तम वने स्वैर विहारात्किमु ॥१॥

आ बाल्याद्विदितं बिडालहतको वैरीति निश्चयं
तस्माद्बिम्बफलादनेऽपि हि भवाञ्जागर्ति सर्वात्मना ।
सत्यं किन्तु विधिः कदापि युवयोः कुर्यात्सहावस्थितिं
साधो कीर तदा क्रियेत भवता किं नाम कालोचितम् ॥२॥

“आराद्दारुणधूर्तगृहादुपवनं प्राप्यं मया प्रापितः
कार्यं साधय मामकं द्रुत”मिति त्वामाह धूर्ताग्रणीः ।
त्यक्त्वाप्यात्मसुखं तथैव विहितं कार्यं च साधो त्वया
जातोऽसौ शुक बन्धने स्मरति ते किं कार्यनिर्वोढृताम् ॥३॥

स्वैरं बिम्बफलैर्वने शुक सुखं पर्याप्तमास्वादितान्
बाल्ये त्वं चरितैः स्वभावमधुरैः सर्वानतर्पीः किल ।
किं त्वेकाकितया दवीयसि नवे देशे जनैः स्वार्थिभिः
साकं ते तिथयः कियत्य इव हा याप्या न जाने चिरात् ॥४॥

काले गच्छति हि क्रमाद्गुरुजनस्सर्वो विपर्येष्यति
च्छिन्नस्नेहभराश्च पूर्वसुहृदो नूनं भविष्यन्त्यहो ।
इत्येवं बहुधा विचिन्त्य विमना मा नाम भूयाश्शुक
त्वामाश्वासयितुं सदैव भविता सत्कर्मसाक्षी विभुः ॥५॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सम्पादकीयम्

ओङ्कारपञ्जरशुकीमुपनिषदुद्यानकेलिकलकण्ठीम् ।
आगमविपिनमयूरीमार्यामन्तर्विभावये गौरीम् ॥

कथं कथमपि भगवत्या जगज्जनन्याः कृपासुधया अभिषिक्ता इयममृतवाणी नवमे वत्सरे पदमादधती सहृदयानामधुना मुदे प्राकाश्यमानीयते । यथापूर्वमस्या आर्थिकमारोग्यं न समञ्जसमिति सखेदं निवेदयामः । आयतिश्चास्या दैवायत्तेति बाढं प्रतीमः । श्रीमन्महीशूरराज्यप्रचाराधिकारिणामन्येषाञ्च महानुभावानाममृतवाणीसाहाय्यककारिणां निर्भरां कृतज्ञतां प्रतिजानीमहे । भगवत्या अमृतवाण्याः कारुण्यमाशास्महे च तेषु ।

हायनेऽस्मिन् बहवो विषयाः प्रपञ्चे भारतवर्षे च समभूवन् खलु । प्रथमं प्रजाराज्यमस्माकं देशे समुद्घोषितमभूत् । तेन सर्वेऽपि भारतीया कृत्स्नं पारतन्त्र्यमलं प्रक्षाल्य बहिरन्तश्च विशुद्धा अजनिषत । अयं सर्वेषां नोऽभ्युदयानन्दहेतुरेव । अत्र किञ्चिद्विषादकारणमपि वक्ष्यमाणमस्मद्वाचकमहानुभावाः क्षमेरन्निति मन्यामहे । तथाहि भारतवर्षस्य सनातनसंस्कृतिं बहुमन्यमाना वाचाम्नायका ज्योतिश्शास्त्रतत्त्वान्यवजानन्ति । अतीतजनवरिमासस्य षड्विंशेऽहनि पूर्वोक्तोद्घोषणं ज्योतिर्विद्दृष्ट्या नितरां दोषभूमपरीतमासीत् । कार्तान्तिकैरपि राष्ट्राधिकारिणो विदितभूतार्था अक्रियन्त । तथापि तदादेशावधीरणापूर्वकमेवाप्रशस्ते दिवसे राष्ट्रस्य महोदयकरं मङ्गल्यमकारि कर्म । त्र्यहात्पूर्वमेव ततो नराः पोतभङ्गेन भागीरथ्यां निमग्नाः स्वप्राणानत्यजन् । एवमन्या अपि ईतिबाधास्तत्र तत्र प्रादुरभवन् । कति

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विमानविपत्तयः कति वा वाष्पशकटसंमर्दसम्पाताः कति वा साम्यवादिसुराचरितानि नृशंसकृत्यानि प्रत्यहं नायान्ति श्रुतिपथम्। को वा न जानाति पौरस्त्यपाकिस्थानीयानां सनातनधर्मानुयायिष्वमानुषाणि दुर्वचानि चेष्टितानि। एवं स्थिते सर्वकृत्येषु नायकैरतीव जागरूकैर्भाव्यं ननु। यद्यप्यस्मद्राष्ट्रशासनं लौकिकं तथापि पुराणसंस्कृतिपक्षपातिभिरुन्नतपदाधिरूढैः सर्वमपि सनातनधर्मसम्बद्धं हेयमिति न मनागपि चिन्तनीयम्। प्रायेण सनातनधर्मानुयायिनः शान्तिप्रियास्तितिक्षाप्रधानाः परधर्मसहिष्णवश्चेति विदितचरम्। निजधर्मसंस्कृतिमहिमानमनुस्मरन्तो न वयं पारयामोऽन्यैर्वैरायितुम्। चिरादत्र भारतवर्षे किं न सनातनधर्मानुयायिनः क्रैस्तैः महम्मदीयैः पारसीकैः यहूदीयैश्च साकं सौभ्रात्रेणान्ववात्सुः एवं गते जातिद्वेषनिरासोपदेशो मैत्रीशासनं वा केषां करणीयमिति न संशयग्रस्तम्। पाकिस्थानीयानामेव शोकोत्पादकानां कार्यमिदमवश्यम्। अनुसन्धाय चेदं तत्त्वं तत्र भवता सुगृहीतनामधेयेन महात्मना गान्धिमिश्रेण नवकालीविषये प्रेममन्त्रोपदेशव्यग्रेण कञ्चित्कालं विचरितं खलु। तथापि पाश्चात्यभेदोपायगरलविसंज्ञानां पाकिस्थानीयानां हृदि नोदपादि कारुण्यचैतन्यमल्पमपि। अविच्छिन्नं शोचनीयदशासु गोष्वपचारमाचरञ्छार्दूलो दोषारोपणं करोति-"एता गावः संहत्य मामभिद्रुह्यन्ति" इति। एवमेते देशान्तरेषु विशिष्य पाश्चात्येषु भारतवर्षस्य सत्कीर्तिं मिथ्यापवादैर्मलिनयन्ति। तादृगपवादप्रसारणे च साहाय्यमाचरन्ति केचिद्भारतश्रेयःसपत्नाः। अस्मच्छासकैरस्य निवारणाय प्रयत्नो महानास्थेय इत्यस्माकं प्रतिभाति।

पश्यन्तु भवन्तः काश्मीरविवादम्। किं नाम कृतं तन्निर्णयाय संयुक्तराष्ट्रसङ्घेन। वर्षत्रितयेऽप्यतिवाहिते सङ्घेन 'कोऽसौ काश्मीरान्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

हठादभ्यषेणयद्' इति न पारितं निर्णेतुम् । तत्रस्था बहवः सत्यं पन्थानं विहाय द्वेषासूयाकषायितमनसः दुष्पक्षान्वितन्वाना जगच्छान्तेर्भङ्गमेवाचरन्ति । कोरियादेशे तु हठादभिषेणने विहितेऽल्पैरेवाहोभिरपराधनिर्णय एव न केवलमकारि अपि तु संयुक्तराष्ट्रचमूरपि काचिद्रणाङ्गणं प्रति प्राहीयत । अस्य विधिभेदस्य निदानं पाठका एव सम्यग्जानन्ति । अस्मत्साचिवधुर्येण श्रीमता नेहरूमिश्रेण यद्यपि अष्टात्रिंशसमरेखामतीत्य संयुक्तराष्ट्रानीकेन न यातव्यमिति वारं वारमुद्घोषितं तथापि कलहकुतूहलिभिः प्रभावशालिभिरन्यैरन्यथैव निरणायि । अद्य तु चीनानां महतीभिरक्षौहिणीभिः सं. रा. सेनायामनतिश्लाघनीयां गमितायां दशां, लोके नीतिविदग्रेसराः श्रीमन्नेहरुमिश्रस्य सदुपदेशस्य स्मरन्ति किल । एवं परस्सहस्रा वर्तन्तेऽधुना लोकशान्तिं प्रशमयन्तोऽरुन्तुदाः क्लेशाः । नेदीयस्यपि विषये आहारद्रव्यदौर्लभ्येन धनलोलुपकापुरुषप्रवर्तितनिलीनवाणिज्येन तथान्यैर्बहुभिर्दुःखदायिभिः पीडानिवहैर्जनानां जीवितं निर्वेदमावहति । भूकम्पादयोऽपि आधिभौतिकाः सन्तापाः असंख्यान् देहिनोऽनैषुः पञ्चताम् । एवं स्थितेऽपि जनताया वा नायकानां वा मनोवृत्तिरीषदपि न विपर्यस्यति ।

अस्मिन् वत्सरे केचिन्महापुरुषा विभूतिमन्तः पार्थिवं कलेवरं विहाय त्रिदिवमारूढाः । तेन कृत्स्नो लोकः शोकेन मूकिमानं विह्वलताञ्चागमत् । तेषु प्रथमो भगवान् सहजसमाध्यधिरूढो रमणमहर्षिः । द्वितीयस्तु महामहिमा योगिवरेण्यः श्रीमदरविन्दघोषमिश्रः । तृतीयः आङ्ग्लकविसार्वभौमो बर्नार्डशानामा प्रथितयशाः ॥ एतेषां महात्मनां शक्तयो भारतभूमेर्मातुः पुत्रानन्यांश्च मानवान् धर्म्येण

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पथा भूयसे श्रेयसे नयन्त्विति चाशास्महे ॥

एतन्मुद्रणकाले एव तत्र भवतो धीराग्रेसरस्य भारतराष्ट्रसङ्घटनपटोर्महाप्रभावस्योपप्रधानामात्यस्य पश्चिमेऽपि वयसि वर्तमानस्य त्रिचतुराणि दिनानि हृदयवेदनावशेन सहसा भौतिकं विहाय शरीरं यशोमयमध्यासीनस्य श्रीमतो वल्लभभायिपटेलमिश्रस्य निधनेन कृत्स्नं भारतवर्षं शान्तिप्रियाणि देशान्तराणि च महति शोकपारावारे निमग्नान्यभूवन् । अतः प्रसीदतु जगज्जननी भारतमातुः पुत्रेषु सन्ततमिति प्रार्थयामहे ॥

काश्यां गैर्वाण्याः कश्चिद्विश्वविद्यालयः प्रतिष्ठाप्यते इति श्रुत्वा प्रमोदमेदुरमस्मकं मानसम् । संस्कृतभाषायै सर्वत्रापि शालासु इतोऽप्यधिकः प्रोत्साहः प्रदेयः इति पूर्वमुक्तमाम्रेडयामः । राज्यशासनानि सर्वविषयेषु गैर्वाण्यामेव लेख्यानीत्यभिप्रेमः । विना च संस्कृतस्य साहाय्यकं कथङ्कारं राष्ट्रभाषा हिन्दी सदायतिर्वर्धेत ॥ देववाणी भारतराष्ट्रजीवितभूता मातेव सर्वान्विदधातु कुशलिनः इति शम् ॥

प्रकृतिविलासाख्यमत्युत्तमं काव्यं पण्डितराजाद्यनेकबिरुदालङ्कृतैः श्री. के. एस्. कृष्णमूर्तिशास्त्रिमहाभागैर्विरचितमस्मत्सकाशमायातम् ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

AMRITAVANI

Fugitive Love Poetry in Sanskrit

(Dewan Bahadur K. S. Ramaswami Sastri)

Though we do not come across in Sanskrit poetry the high and exalted and idealistic and sublimated note of Shelley's love poetry especially in *Epipsychidion* or the sensuous yet etherealised raptures of Keats' Endymion, yet we get in it most subtle and refined and exquisite revelations of the tender moods and exquisite emotions of lovers. The physical effects and manifestations of love and the correspondences of lovers' moods and efflorescences of nature are delineated with loving care and a love of fine insinuation. We see these traits not only in the highlights of Sanskrit love poetry in Valmiki and Kalidasa and Bhavabhooti, but also in other poems and dramas. We come across them here, there and everywhere in innumerable collections of verse like the Sarngadharapaddhati, Subhashitaratnabhandagara, Sabdakalpadruma etc. We find very exquisite specimens in various works on erotics and aesthetics and poetics. Many such verses are found sometimes in unexpected places dealing with other matters. Not a few have been passing from mouth to mouth and have been lovingly handed down by tradition. The two most noteworthy of the minor love poems are *Amarusataka* and *Gatha Saptasati*.

Amarusataka contains very exquisite love-poetry. The author must have lived before the 8th century A.D., because Vamana, the author of Kavyalankara Sutras, who lived then, quotes from Amarusataka. The story about Sri Sankaracharya having entered the corpse of King Amaru to learn Kamasastra and answer the questions of

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Ubhayabharati smacks of legendary lore. It is said that the minister, finding the King to be a man of great genius, unlike his former self and guessing that some great Yogi must have taken possession of the body after the King's death sent emissaries to cremate all stray corpses found anywhere. These came across Sankara's body which was being watched by his disciples and tried to cremate it. Sankara then hastened to his own body and sang a hymn to God Lakshminarasimha who had the fire put down to save the body. Sankara then defeated Ubhaya Bharati by answering her questions about the science .of erotics ! One version states that the King was the King of Kashmir. There is no internal testimony in the work to support the legend and the externl testimony is not worthy of credence.

Each verse in the Sataka gives a fine description of a single erotic situation or a single erotic mood. A noble feature about the work is that it depicts the constancy of woman as contrasted with the fickleness of man. A recurrent theme is that the wronged woman must overlook and forgive man's peccadilloes. The poet is highly skilled in analysing the erotic mood and its external manifestations. He shows how the anger of the woman at her lover's inconstancy heightens her charms and makes him her slave more than ever before. The poet warns the woman against overdoing her angry mood (mana). He shows also how an ironic submissiveness and affection on the part of the woman is detected as easily as her anger.

There is charm as well as pathos in the stanzas describing a woman waiting and waiting for her absent

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

lover who has gone far away on business. Equally charming and pathetic are the verses descriptive of the anguish of the separated lover.

देशैरन्तरिता शतैश्च सरितामुर्वीभृतां काननै-
यत्नेनापि मयातिलोचनपथं कान्तेति जानन्नपि ।
उद्ग्रीवश्चरणार्धरुद्धवसुधः प्रोन्मृज्य सास्रे दृशौ
तामाशां पथिकस्तथापि किमपि ध्यायन्पुनर्वीक्षते ॥

Another mood often depicted by the poet is—the romantic bliss of youthful passion fades away soon and gives place to mild affection and becomes a mere attachment and ends by mutual toleration in irksome married life. It sometime even turns into arid and cynical bitterness !

पुराभूदस्माकं प्रथममविभिन्ना तनुरियं
ततो नु त्वं प्रेयान् वयमपि हताशाः प्रियतमाः ।
इदानीं नाथस्त्वं वयमपि कलत्रं किमपरं
हतानां प्राणानां कुलिशकठिनानां फलमिदम् ॥

कोपो यत्र भ्रुकुटिरचना निग्रहो यत्र मौनं
यत्रान्योन्यस्मितमनुनयो दृष्टिपातः प्रसादः ।
तस्य प्रेम्णस्तदिदमधुना वैशसं पश्य जातं
त्वं पादान्ते लुठसि न च मे मन्युमोक्षः खलायाः ॥

गते प्रेमबन्धे प्रणयबहुमाने विगलिते
निवृत्ते सद्भावे जन इव जने गच्छति पुरः ।
तदुत्प्रेक्ष्योत्प्रेक्ष्य प्रियसखि गतांस्तांश्च दिवसा-
न्न जाने को हेतुर्दलति शतधा यन्न हृदयम् ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

I have thus far tried to picture the poet's rendering of the truth "that the course of true love never did run smooth." But far more natural and charming and attractive are his descriptions of the first glow and glory of love in the human heart. It is often thought that this aspect is not fully brought out by Indian poets. But I have shown the inadequacy of this view by stressing the manner in which Kalidasa delineates the dawn of the tender passion. I have shown also how in Malathi-Madhava, Bhavabhuti describes it in a masterly way, though with that affluence of delicate charm of which Kalidasa is a past master. The following verse in Amaru-Sataka describes in a perfect way the bliss of loitering near the beloved's house.

चक्षुःप्रीतिप्रसक्ते मनसि परिचये चिन्त्यमानाभ्युपाये
रागे यातेऽतिभूमिं विकसति सुतरां गोचरे दूतिकायाः ।
आस्तां दूरेण तावत्सरभसदयितालिंगनानन्दलाभ-
स्तद्गेहोपान्तरथ्याभ्रमणमपि परां निर्वृतिं सन्तनोति ॥

But by far the most charming and valuable of the poet's descriptions relate to the perfect abandon and spontaneity and bliss of youthful love. The mood is that described in Moore's famous poem about Love's Young Dream. I may refer here to the stanza which describes the delicious babble of love which robes the world in new glory, the verse in which the bride says that in her lover's presence she becomes all eyes or all ears the stanza in which a woman's love and shyness contend for mastery, and the stanaza in which in later life the woman regrets how her bashfulness interfered with her bliss.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

चिरविरहिणो रत्युत्कण्ठात् श्लथीकृतगात्रयो-
नवमिव जगज्जातं भूयश्चिरादभिनन्दतोः ।
कथमिव दिने दीर्घे याते निशामधिरूढयोः
प्रसरति कथा बह्वी यूनोर्यथा न तथा रतिः ॥

न जाने संमुखायाते प्रियाणि वदति प्रिये ।
सर्वाण्यंगानि किं यान्ति नेत्रतां किमु कर्णताम् ॥

शून्यं वासगृहं विलोक्य शयनादुत्थाय किंचिच्छनै-
र्निद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखम् ।
विस्रब्धं परिचुंब्य जातपुलकामालोक्य गंडस्थलीं
लज्जा नम्रमुखी प्रियेण हसता बाला चिरं चुंबिता ॥

श्लिष्टः कंठे किमिति न मया मूढया प्राणनाथ-
श्चुंबत्यस्मिन् वदनविनतिः किं कृता किं न दृष्टः ।
नोक्तः कस्मादिति नववधूचेष्टितं चिन्तयन्ती
पश्चात्तापं वहति तरुणी प्रेम्णि जाते रसज्ञा ॥

Even more charming, if at all, is the re-emergence of bliss when after falling out the lovers conquer their quarrel and "kiss again with tears". The following verse descriptive of that mood is a perfect gem.

एकस्मिन् शयने पराङ्मुखतया वीतोत्तरं ताम्यतो-
रन्योन्यं हृदयस्थितेऽप्यनुनये संरक्षतोर्गौरवम् ।
दंपत्योः शनकैरपांगवलनान्मिश्रीभवच्चक्षुषो-
र्भग्नो मानकलिस्सहासरभसं व्यावृत्तकंठग्रहः ॥

It might be thought and said that early marriage and polygamy are destructive of true romance in life. One might retort that courtship and divorce also have their

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain: Digitization by eGangotri

